धर्मशास्त्र

अ. नं. १०

३२८ स्मृ : १५

याज्ञवल्क्य स्मृति

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

धर्मशास्त्र

(1)

ः॥ श्रीगणेशाय नमः ॥ योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयो ब्रवीत् ॥ वर्णाश्रमेतराणां नो
ब्रूहि धर्मानशेषतः ॥ १ ॥ मिथिलास्थः स योगींद्रः क्षणं ध्यात्वाब्रवीन्मुनीन् ॥ यस्मिन्देशे मृगः कृ
ष्णःस्तस्मिन्धर्मान्निबोधत ॥ २ ॥ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः ॥ वेदाः स्थाना
नि विद्यानां धर्मस्य च चतुर्दश ॥ ३ ॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः ॥ यमापस्तंब
संवर्त्ताः कात्यायनबृहस्पती ॥ ४ ॥ पराशरव्यासशंखलिखिता दक्षगौतमौ ॥ शातातपो व
सिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ ५ ॥ देशे काले उपायेन द्रव्यं श्रद्धासमन्वितं ॥ पात्रे प्रदीयते यत्त
त्सकलं धर्मलक्षणं ॥ ६ ॥ श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥ सम्यक्संकल्पज
ः कामो धर्ममूलमिदं स्मृतं ॥ ७ ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां ॥ अयं तु परमो
धर्मो यद्योगेनात्मदर्शनं ॥ ८ ॥ चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा ॥ सा ब्रूते यं स धर्म

Rajwade Sanshodhan Mandal, Dhule ... Yashwantrao Chavan Pratishthan, Mumbai

(2)

या॰वृ॰ स्यात्तदेकोवाध्यात्मवित्तमः॥९॥ इतिउपोद्घातप्रकरणम्॥ छ॥ब्राह्मणक्षत्रियविट्शूद्रावर्
१ णास्त्वाद्यास्त्रयोद्विजाः॥निषेकाद्याःश्मशानांतामास्येतेजातकर्मच॥१०॥गर्भाधानमृतौपुं
सःसवनंस्पंदनात्पुरा॥षष्टेष्टमेवासीमंतोमास्येतेजातकर्मच॥११॥अहन्येकादशेनामच
तुर्थेमासिनिःक्रमः॥षष्टेन्नप्राशनंमासिचूडाकार्यायथाकुलं॥१२॥एवमेनःशमंयातिबी
जगर्भसमुद्भवं॥तूष्णीमेताःक्रियाःस्त्रीणांविवाहस्तुसमंत्रकः॥१३॥गर्भाष्टमेष्टमेवाब्देब्रा
ह्मणस्योपनायनं॥राज्ञामेकादशेसैकेविशामेकेयथाकुलं॥१४॥उपनीयगुरुःशिष्यं
महाव्याहृतिपूर्वकं॥वेदमध्यापयेदेनंशौचाचारांश्चशिक्षयेत्॥१५॥दिवासंध्यासुकर्ण
स्थब्रह्मसूत्रउदङ्मुखः॥कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखः॥१६॥गृहीतशिश्नश्चो १६
त्थायमृद्भिरभ्युद्धृतैर्जलैः॥गंधलेपक्षयंशौचंकुर्यादतंद्रितः॥१७॥अंतर्जानुशुचौदेशेउ

(2A)

पविष्टउदङ्मुखः॥ प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमपस्पृशेत॥१८॥ कनिष्ठादेशिन्यंगु
ष्टमूलान्यग्रेकरस्यच॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात॥१९॥ त्रिःप्राश्यापोद्विरु
न्मृज्यखान्यद्भिःसमुपस्पृशेत॥ अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः॥२०॥ हृत्कंठता
लुगाभिस्तुयथासंख्यंद्विजातयः॥ शुध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः॥२१॥ स्नान
मब्दैवतैर्मंत्रैःमार्जनंप्राणसंयमः॥ सूर्यस्यचाप्युपस्थानंगायत्र्याःप्रत्यहंजपः॥२२॥ गाय
त्रींशिरसासार्धंजपेद्व्याहृतिपूर्विकां॥ प्रतिप्रणवसंयुक्तांत्रिरयंप्राणसंयमः॥२३॥ प्राणाना
यम्यसंप्रोक्ष्यतृचेनाब्दैवतेनतु॥ जपन्नासीतसावित्रींप्रत्यगातारकोदयात॥२४॥ संध्यां
प्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात॥ अग्निकार्यंततःकुर्यात्संध्ययोरुभयोरपि॥२५॥
ततोभिवादयेद्वृद्धानसावहमितिब्रुवन॥ गुरुंचैवाप्युपासीतस्वाध्यायार्थंसमाहितः

A joint project of The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

या॰व॰ ॥२६॥ आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ॥ हितं चास्याचरेन्नित्यं मनोवाक्कायकर्मभि
२ :॥२७॥ कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः ॥ अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवि
(3) त्तदाः ॥२८॥ दंडाजिनोपवीतानि मेखलां चैव धारयेत् ॥ ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्म
वृत्तये ॥२९॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ॥ ब्राह्मणक्षत्रियविशां भैक्षचर्या य
थाक्रमं ॥३०॥ कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया ॥ अपोशानक्रियापूर्वं सत्कृत्यान्न
मकुत्सयन् ॥३१॥ ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ॥ ब्राह्मणः काममश्नीयाच्छ्रा
द्धे व्रतमपीडयन् ॥३२॥ मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं ॥ भास्करालोकनाश्ली
लपरिवादादि वर्जयेत् ॥३३॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ॥ उपनीय ददद्वे १७
दमाचार्यः स उदाहृतः ॥३४॥ एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते ॥ एते मान्या यथा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

पूर्वमेभ्यो माता गरीयसी ॥ ३५ ॥ प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा ॥ ग्रहांतिकमित्येके के
शांतश्चैव षोडशे ॥ ३६ ॥ आषोडशाद्वाविंशाश्च· चतुर्विंशाच्च वत्सरात् ॥ ब्रह्मक्षत्रविशां काल
औपनायनिकः परः ॥ ३७ ॥ अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः ॥ सावित्रीपतिता व्रात्या व्रा
त्यस्तोमादृते क्रतोः ॥ ३८ ॥ मातुर्यदग्रे जायं[illegible]यं मौंजिबंधनात् ॥ ब्राह्मणक्षत्रियविश
स्मादेते द्विजाः स्मृताः ॥ ३९ ॥ यज्ञानां तपस[illegible]देवांस्तर्पयेद्द्विजः ॥ पितॄन्मधुघृताभ्यां
च ऋचोधीते तु योन्वहं ॥ ४० ॥ यजूंषी शक्ति[illegible]योन्वहं स घृतामृतैः ॥ प्रीणाति देवाना
ज्येन मधुना च पितॄंस्तथा ॥ ४१ ॥ स तु सोमघृतैर्देवांस्तर्पयेद्योन्वहं पठेत् ॥ सामानि तृप्तिं
कुर्याच्च पितृणां मधुसर्पिषा ॥ ४२ ॥ मेदसा तर्पयेद्देवानथर्वांगिरसः पठेन् ॥ पितॄंश्च म
धुसर्पिर्भ्यामन्वहं शक्तितो द्विजः ॥ ४३ ॥ वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकां ॥ इति

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(५)

या॰द॰ हासांस्तथाविद्याःशक्त्याधीतेह्यियोन्वहं॥४५॥मांसक्षीरोदनमधुतर्पणंसदिवौकसां॥क
३ रोतितृप्तिंकुर्याच्चपितृणांमधुसर्पिषा॥४६॥तेतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैः॥य
यंक्रतुमधीयीततस्यतस्याप्नुयात्फलं॥४७॥त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते॥त
पसश्चपरस्येहनित्यंस्वाध्यायवान्द्विजः॥४८॥नैष्ठिकोब्रह्मचारीचवसेदाचार्यसन्निधौ॥त
दभावेस्यतनयेपत्न्यांवैश्वानरेपिवा॥४९॥अनेनविधिनादेहंसाधयन्विजितेंद्रियः॥ब्रह्मलो
कमवाप्नोतिनचेहजायतेपुनः॥५०॥ छ ॥इतिब्रह्मचारीप्रकरणम्॥ छ॥गुरवेतुवरंदत्वा
स्नायीततदनुज्ञया॥वेदंव्रतानिवापारंनीत्वाह्युभयमेववा॥ ५१॥अविप्लुतब्रह्मचर्योलक्ष १८
ण्यांस्त्रियमुद्वहेत्॥अनन्यपूर्विकांकांतामसपिंडांयवीयसीं॥५२॥अरोगिणींभ्रातृमतीं
मसमानार्षगोत्रजां॥पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथा॥५३॥दशपुरुषविख्याता

(5A)

श्रोत्रियाणांमहाकुलान्॥स्फीतादपिनसंचारीरोगदोषसमन्वितान्॥५४॥ऋदिकेनिलमूत्र
स्तुएतैरेवगुणैर्युक्तः सवर्णः श्रोत्रियोवरः॥यत्नात्परीक्षितःपुंस्त्वेयुवाधीमान्जनप्रियः ५५
यदुच्यतेद्विजातीनांशूद्राद्दारोपसंग्रहः॥नैतन्ममतंयस्मात्तत्रात्माजायतेस्वयं॥५६॥ति
स्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमं॥ब्राह्मणक्षत्रियविशांभार्याःस्वाशूद्रजन्मनः॥५७॥ब्राह्मो
विवाहआहूयदीयतेशक्त्यलंकृता॥तज्जःपुनात्युभयतःपुरुषानेकविंशतिं॥५८॥यज्ञस्थ
ऋत्विजेदैवोआदायार्षस्तुगोद्वयं॥चतुर्दशप्रथमजःपुनात्युत्तरजश्चषट्॥५९॥इत्युक्त्वाच
रतांधर्मंसहयादीयतेर्थिने॥सकायःपावयेत्तज्जःषट्षट्वंश्यान्सहात्मना॥६०॥आसुरो
द्रविणादानात्गांधर्वःसमयान्मिथः॥राक्षसोयुद्धहरणात्पैशाचःकन्यकाछलात्॥६१॥
पाणिर्ग्राह्यःसवर्णासुगृह्णीयात्क्षत्रियाशरं॥वैश्याप्रतोदमादद्याद्वेदनेत्वग्रजन्मनः॥६२॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)



पितापितामहोभ्राताःसकुल्योजननीतथा॥कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः॥६३॥अप्र
यच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ॥गम्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरं॥६४॥सकृत्प्र
दीयतेकन्याहरंस्तांचौरदंडभाक्॥दत्तामपिहरेत्पूर्वांश्रेयांश्चेद्वरआव्रजेत्॥६५॥अनाख्या
यददद्दोषंदंड्यउत्तमसाहसं॥अदुष्टांचत्यजन्दंड्योदूषयंस्तुमृषाशतं॥६६॥अक्षताचक्ष
ताचैवपुनर्भूःसंस्कृतापुनः॥स्वैरिणीयापतिंहित्वासवर्णंकामतःश्रयेत्॥६७॥अपुत्रांगुर्व
नुज्ञातोदेवरःपुत्रकाम्यया॥सपिंडोवासगोत्रोवाघृताभ्यक्तऋतावियात्॥६८॥आगर्भसं
भवाद्गच्छेत्पतितस्त्वन्यथाभवेत्॥अनेनविधिनाजातःक्षेत्रजोस्यभवेत्सुतः॥६९॥हृताधि
कारांमलिनांपिंडमात्रोपजीविनीं॥परिभूतामधःशय्यांवासयेद्व्यभिचारिणीं॥७०॥सोमः
शौचंददौस्त्रीणांगंधर्वश्चशुभांगिरं॥पावकःसर्वमेध्यत्वंमेध्यावैयोषितोह्यतः॥७१॥व्यभि

(5A)

चा[illegible]तोशुद्धिर्गर्भेत्यागोविधीयते॥गर्भभर्तृवधादौचतथामहतिपातके॥७२॥सुरापीव्या-
धिताधूर्त्तावंध्यार्थघ्न्यप्रियंवदा॥स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा॥७३॥आधिविन्नातु
भर्त्तव्यामहदेनोन्यथाभवेत्॥यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्द्धते॥७४॥मृतेजीवतिवा
पत्योयानान्यमधिगच्छति॥सेहकीर्तिमवाप्नोतिमोदतेचोमयासह॥७५॥आज्ञासंपादि-
नींदक्षांवीरसूंप्रियवादिनीं॥त्यजन्दापयेत्तृतीयांशमद्रव्योभरणंस्त्रियाः॥७६॥स्त्रीभिर्भ
र्त्तवचःकार्यमेषधर्मःपरःस्त्रियाः॥आशुद्धेःसंप्रतीक्ष्योहिमहापातकदूषितः॥७७॥लोका
नंत्यंदिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैः॥यस्मात्तस्मात्स्त्रियःसेव्याःकर्त्तव्याश्चसुरक्षिता
ः॥७८॥षोडशर्त्तुनिशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत्॥ब्रह्मचार्येवपर्वाण्याद्याश्चतस्र
स्तुवर्जयेत्॥७९॥एवंगच्छन्स्त्रियंक्षामांमघांमूलंपौष्णंचवर्जयेत् सुस्थइंदौसकृत्पुत्रंल

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6) ह्लएवंजनयेत्पुमान्॥८०॥यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन् स्वदारनिरतश्चैवस्त्रियो
५ रक्ष्यायतःस्मृताः॥८१॥भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः॥बंधुभिश्चस्त्रियःपूज्याभूष
णाछादनाशनैः॥८२॥संचितोपस्कारादक्षाहृष्टाव्ययपराङ्मुखी॥कुर्याच्छ्वशुरयोःपादवं
दनंभर्तृतत्परा॥८३॥क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनं॥हास्यंपरगृहेयानंत्यजेत्प्रो
षितभर्तृका॥८४॥रक्षेत्कन्यांपिताविन्नांपतिःपुत्रास्तुवार्द्धके॥अभावेज्ञातयस्तेषांस्वातं
त्र्यंनक्वचित्स्त्रियाः॥८५॥पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः॥हीनानस्याद्विनाभर्त्रा
गर्हणीयान्यथाभवेत्॥८६॥पतिप्रियहितेयुक्तास्वाचाराविजितेंद्रिया॥इहकीर्त्तिम
वाप्नोतिप्रेत्यचानुत्तमांगतिं॥८७॥सत्यामन्यांसवर्णायांधर्मकार्यंनकारयेत्॥सवर्णासु १७०
विधौधर्म्येज्येष्ठयानविनेतरा॥८८॥दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिः॥आह

रेद्विधिवद्दारानग्नींश्चैवाविलंबयन् ॥ ८९ ॥ छ इतिपत्नीप्रकरणम् छ ॥ सवर्णेभ्यः स
वर्णासुजायंतेहिसजातयः ॥ अनिंद्येषुविवाहेषुपुत्राःसंतानवर्द्धनाः ॥ ९० ॥ विप्रान्मूर्द्धाव
सिक्तोहिक्षत्रियायांविशःस्त्रियां ॥ अंबष्टःशूद्र्यांनिषादोजातःपारशवोपिवा ॥ ९१ ॥ वैश्यशू
द्रोस्तुराजन्यान्माहिष्योग्रोसुतोस्मृतौ ॥ वैश्यास्तुकरणःशूद्र्यांविन्नास्वेषविधिःस्मृतः
९२ ॥ ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहकस्तथा ॥ शूद्राज्जातस्तुचांडालःसर्वधर्मबहि—
तः ॥ ९३ ॥ क्षत्रियामागधंवैश्याच्छूद्रात्क्षत्तारमेवच ॥ शूद्रादायोगवंवैश्याजनयामास
वैसुतं ॥ ९४ ॥ माहिष्येणकरण्यांतुरथकारःप्रजायते ॥ असत्संतश्चविज्ञेयाप्रतिलोमा-
नुलोमजाः ॥ ९५ ॥ जात्युत्कर्षोयुगेज्ञेयःपंचमेसप्तमेपिवा ॥ व्यत्ययेकर्मणांसाम्यंपूर्वव
च्चाधरोत्तरं ॥ ९६ ॥ इतिजातिविवेकप्रकरणम् ॥ छ ॥ कर्मस्मार्त्तंविवाहाग्नौकुर्वीत

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

२३

या॰ व॰

६

(७)

प्रत्यहं गृही॥ दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥९७॥ शरीरचिंतां निर्वर्त्य कृतशौ
चविधिर्द्विजः॥ प्रातः सं‍ध्यामुपासीत दंतधावनपूर्विकं॥९८॥ हुत्वाग्निसूर्यदैवत्या
ञ्जपेन्मंत्रान्समाहितः॥ वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च॥९९॥ उपेयादीश्वरं
चैव योगक्षेमार्थसिद्धये॥ स्नात्वा देवान्पितॄंश्चैव तर्प्पयेदर्चयेत्तथा॥१००॥ वेदाथर्वपुरा
णानि सेतिहासानि शक्तितः॥ जपयज्ञप्रसिद्ध्यर्थं विद्यांचाध्यात्मिकीं जपेत्॥१॥ बलिक
र्मस्वधाहोमस्वाध्यायातिथिसत्क्रिया॥ भूतपित्रमरब्रह्ममनुष्याणां महामखाः॥२॥
देवेभ्यस्तु हुतादन्नात्॥ शेषाद्भूतबलिं हरेत्॥ अन्नं भूमौ श्वचांडालवायसेभ्यश्च निक्षि
पेत्॥३॥ अन्नं पित्तमनुष्येभ्यो देयमप्यन्वहं जलं॥ स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमा ९७१
त्मने॥४॥ बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः॥ संभोज्यातुरभृत्यांश्च दंपत्योः शेष

(7A)

भोजनें ॥ ५ ॥ अपोशानेनोपरिष्टादधस्तादश्नता तथा ॥ अनग्नममृतं चैव कार्यमन्नं द्वि
द्विजन्मना ॥ ६ ॥ अतिथित्वेन वर्णानां देवेशाक्यानुपूर्वशः ॥ अप्रणोद्योतिथिः सायमपि वा भू
त्वणोदकैः ॥ ७ ॥ सत्कृत्य भिक्षावे भिक्षा दातव्या सुव्रताय च ॥ भोजयेच्चागतान्काले सखिसं
बंधिबांधवान् ॥ ८ ॥ महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत ॥ सत्क्रियान्वासनं स्वादु भो
जनं सूनृतं वचः ॥ ९ ॥ प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः ॥ प्रियो वैवाह्यश्च तथा
यज्ञं प्रत्यृत्विजः पुनः ॥ १० ॥ अध्वनीनोतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ॥ मान्यावेतौ गृह
स्थस्य ब्रह्मलोकमभीप्सता ॥ ११ ॥ परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते ॥ वाक्पाणिपा
दचापल्यं वर्जयेच्चातिभोजनं ॥ १२ ॥ अतिथिं श्रोत्रियं तृप्तमासीमांतादनुव्रजेत ॥ अ
हःशेषं सहासीत शिष्टैरिष्टैश्च बंधुभिः ॥ १३ ॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

या०व० स्यच॥भृत्यैःपरिवृतोभुक्त्वानातितृप्त्याथसंविशेत॥१४॥ब्राह्मेमुहूर्त्तेचोत्थायचिंतयेदात्मनो
७ हितं॥धर्मार्थकामान्स्वेकालेयथाशक्तिनहापयेत॥१५॥विद्याकर्मवयोबंधुवित्तैर्मान्या
यथाक्रमं॥एतैःप्रभूतैःशूद्रोपिवार्द्धकेमानमर्हति॥१६॥वृद्धभारिनृपस्नातस्त्रीरोगिवरच
क्रिणां॥पं — देयोनृपस्तेषांमान्यस्नातश्चभूपतेः॥१७॥इज्याध्ययनदानानिवैश्यस्यक्षत्रि
यस्यच॥प्रतिग्रहोधिकोविप्रेयाजनाध्यापनेतथा॥१८॥प्रधानंक्षत्रियेकर्मप्रजानांप
रिपालनं॥कुसीदंकृषीवाणिज्यंपाशुपाल्यंविशःस्मृतं॥१९॥शूद्रस्यद्विजशुश्रूषातयाजी
वन्वणिक्भवेत॥शिल्पैर्वाविविधैर्जीवेत्द्विजातिहितमाचरन्॥२०॥भार्यारतिःशुचिर्भृ
त्य०भर्त्ताश्राद्धक्रियारतः॥नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत॥२१॥अहिंसासत्यम १०२
स्तेयंशौचमिंद्रियनिग्रहः॥दानंदयादमःक्षांतिःसर्वेषांधर्मसाधनं॥२२॥वयोबुद्ध्यर्थ

(8A)

नाग्वेषश्रुताभिजनकर्मणां ॥ आचारसद्द – वृत्तिमजिह्मामशठांतथा ॥ २३ ॥ त्रैवार्षिकाधि
कान्नोयः सहिसोमंपिबेद्द्विजः ॥ प्राकृत्यो मिकीः क्रियाः कुर्यान्नयस्यान्नंवर्षिकंभवेत् ॥ २४ ॥ कु
शूलकुंभीधान्योवात्र्यहिकोश्वस्तनोपिवा जीवेद्वापिशिलोंछेन श्रेयानेषांपरःपरः २५
॥ ५ ॥ इतिगृहस्थधर्मप्रक० ॥ नस्वाध्यायविरोध्यर्थमीहेतनयतस्ततः ॥ नविरुद्धप्रसं
गेनसंतोषीचभवेत्सदा ॥ २६ ॥ राज्ञांतेवासिराज्ञेभ्यः सीदन्निछेध्धनंक्षुधा ॥ दंभिहैतुक
पाखंडिबकवृत्तिंश्चवर्जयेत् ॥ ३० ॥ शुक्लांबरधरोनीचकेशश्मश्रुनखः शुचिः ॥ नभार्याद
र्शनेश्नीयान्नैकवासानसंस्थितः ॥ ३१ ॥ नसंशयंप्रपद्येतनाकस्मादप्रियंवदेत् ॥ नाहि
तंनानृतंचैवनस्तेनस्यान्नवाहुकी ॥ ३२ ॥ रात्नायणी ब्रह्मसूत्रीवेणुमान्सकमंडलुः ॥ कु
र्यात्प्रदक्षिणांदेवमृज्जोविप्रवनस्पतीन् ॥ ३३ ॥ नतुमेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु

या॰व॰ नप्रत्यक्कार्ग्निगोसोमसंध्यांबुस्त्रीद्विजन्मनां॥३४॥नेक्षेतार्कंननग्नांस्त्रींनचसंस्पृष्टमैथुनां
८ ॥नचमूत्रंपुरीषंवानाशुचीराहुतारकाः॥३५॥अयमेवज्रइत्येवंसर्वंमंत्रमुदीरयेत्॥वर्ष
(१) त्यप्रावृतोगच्छेत्स्वपेत्प्रत्यक्शिरानच॥३६॥ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुननिक्षिपे
त्॥पादौप्रतापयेन्नाग्नौचैनंनाभिलंघयेत्॥३७॥जलंपिबेन्नांजलिनानशयानंनप्रबोधयेत्
॥नाक्षैःक्रीडेन्नधर्मघ्नैर्व्याधितैर्वानसंविशेत्॥३८॥विरुद्धंवर्जयेत्कर्मप्रेतधूमंनदीत
रं॥केशभस्मतुषांगारकपालेषुचसंस्थितिं॥३९॥नाचक्षीतधयंतींगांनाद्वारेणविशेत्
क्वचित्॥नराज्ञःप्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः॥४०॥प्रतिग्रहेसूनिचक्रिध्वजि
वेश्यानराधिपाः॥दुष्टादशगुणंपूर्वात्पूर्वादेतेयथोत्तरं॥४१॥अध्यायानामुपाकर्म १७३
श्रावण्यांश्रवणेनवा॥हस्तेनौषधिभावेवापंचम्यांश्रावणस्यतु॥४२॥पौषमासस्यरो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

हिण्यामष्टकायामथापि वा ॥ जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः ॥ ५३ ॥ त्र्यहं प्रेतेष्वनध्या
यः शिष्यर्त्विग्गुरुबंधुषु ॥ उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते ॥ ५४ ॥ संध्यागर्जितनि
र्घातभूकंपोल्कानिपातने ॥ समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥ ५५ ॥ पंचदश्यां चतुर्द
श्यामष्टम्यां राहुसूतके ॥ ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥ ५६ ॥ पशुमंडूकनकुल
श्वाहिमार्जारमूषकैः ॥ कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥ ५७ ॥ श्वक्रोष्टुगर्दभोलूक
सामबाणार्त्तनिःस्वने ॥ अमेध्यशवशूद्रांत्यश्मशानपतितांति ॥ ५८ ॥ देशेऽशुचावात्मनि
च विद्युत्स्तनितसंप्लवे ॥ भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते ॥ ५९ ॥ पांसुवर्षे दिशां
दाहे संध्यानीहारभीतिषु ॥ धावतः पूतिगंधे च शिष्टे च गृहमागते ॥ ५० ॥ खरोष्ट्रयान
हस्त्यश्वनौवृक्षेरिणरोहणे ॥ सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः ॥ ५१ देवर्त्वि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)

कृस्नातकाचार्यराज्ञां छायां परस्त्रियाः ॥ नक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादि च ॥ ५२ ॥ वि
ए प्राहिक्षत्त्रियाश्चाद्यां भांसि समुत्पानो नावज्ञेयाः कदाचन ॥ आमृत्योः श्रियमाकांक्षेन्नर कं
चिन्मर्माणि स्पृशेत ॥ ५३ ॥ दूराउच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेत ॥ श्रुतिस्मृत्युदितं सम्य
क्नित्यमाचारमाचरेत ॥ ५४ ॥ गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत ॥ न निंदाता
डने कुर्यात्सुतं शिष्यं च ताडयेत ॥ ५५ ॥ अ[illegible] शरीरस्य नोत्तमांगेन वक्षसि ॥ अतोन्यथा
ताडयंस्तु नरः पापेन युज्यते ॥ ५६ ॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत ॥ अस्वर्ग्यं लो
कविद्विष्टं धर्ममप्याचरेन्न तु ॥ ५७ ॥ मातापितृतिथिभ्रातृजामिसंबंधिमातुलैः ॥ वृद्धबालातु
राचार्यवैद्यसंश्रितबांधवैः ॥ ५८ ॥ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः ॥ विवादं १७ध
वर्जयित्वा तु सर्वान् लोकाञ्जयेद्गृही ॥ ५९ ॥ पंच पिंडाननुद्धृत्य न स्नायात्परवारिषु ॥ २

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(10A)

स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च ॥ ६ ॥ पंचशय्यासनोद्यानगृहयानानि वर्जयेत् ॥ ७
अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि ॥ ८ ॥ कदर्यबद्धचौराणां क्लीबरंगावतारिणां ॥ वै
णाभिशस्तवार्धुष्यगणिकागणदीक्षिणां ॥ ९ ॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां
क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनां ॥ १० ॥ अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामया
जिनां ॥ शस्त्रविक्रयीकर्मारतंतुवायश्व[illegible]नां ॥ ११ ॥ पिशुनानृतिनोश्चैव तथा चाक्रिक
बंदिनां ॥ एषामन्नं न भोक्तव्यं सोमविक्र[illegible]स्तथा ॥ १२ ॥ शूद्रेषु दासगोपालकुलमित्रा
र्धसीरिणः ॥ भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥ १३ ॥ छ ॥ इति स्नातकप्र
करणं ॥ छ ॥ अनर्चितं रथामांसं केशकीटसमन्वितं ॥ शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं प
तितेक्षितं ॥ १४ ॥ उदक्यास्पृष्टसंघुष्टपर्यायान्नं च वर्जयेत् ॥ गोघ्रातं शकुनोच्छिष्टं पदास्पृ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com